# विषय ः नव्यव्याकरणम्

**पाठ्यांशनाम -** पातञ्जलसिद्धान्तः नैयायिकाभिमतप्रमाणानि च । **पाठ्यांशसङ्केतः -** नव्यव्याकरणम्
**स्तरः -** शास्त्री **पूर्णाङ्काः -** १००
**वर्षम् -** द्वितीयम् वार्षिकः पाठ्यभारः **-** १६० घण्टाः
**पत्रम् -** तृतीयम् साप्ताहिकः पाठ्यभारः **-** ६

## १. पाठ्यांशपरिचय ः-

पञ्चप्रकरणयुतोऽयं पाठ्यांशः । अयं नव्यव्याकरणविषयमाधृत्य शास्त्रीप्रथमखण्डं समुत्तीर्णानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य तृतीयपत्रत्वेन निर्धारितो वर्तते ।

अत्र **कख**प्रकरणयोः पातञ्जलमहाभाष्यान्तर्गतप्रथमद्वितीयाह्निकस्था विषयाः सन्ति निर्धारिताः । पदसाधुत्वबोधने सारल्येन यादृशं व्यवस्थितं स्वरूपं पाणिनीयव्याकरणस्य विद्यते न तादृशमन्यस्य । अत एव सर्वदर्शनेषु अस्य वैशिष्ट्यमप्रतिमम् । तत्र पाणिनीयसूत्राणां व्याख्यायकः पतञ्जलिः । सूत्रक्रमानुसारिव्याख्यानं महाभाष्यम् । यतः सर्पो मणिं विना स्वमहत्त्वाधायकं जीवनं धर्तुं न समर्थः, तद्वदेव-इदमपि सर्वोपकारकं व्याकरणशास्त्रं मणितुल्यं पातञ्जलमहाभाष्यव्याख्यानं विना नैवाऽसदिग्धार्थस्वरूपं बोधयितुमर्हति । अत एव पतञ्जलिप्रणीतस्य महाभाष्यस्य पस्पशाह्निकतः प्रत्याहाराह्निकपर्यन्तं निरूपितानां विषयाणां समावेशोऽत्र विद्यते ।

तथैव **गघङ**प्रकरणेषु न्यायसम्बद्धानामनुमानोपमानशब्दप्रमाणानां सलक्षणोदाहरणव्याख्यानेन प्रमाणनिरूपणमत्र विधीयते । अनुमानप्रमाणे पूर्वपक्षसिद्धान्तव्याप्ति-हेत्वाभासस्य विशेषतो विवेचनीयविषयात्र सङ्ग्रहो विद्यते ।

## २. पाठ्यांशसामान्योद्देश्यानि-

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोऽङ्कितेषु विषयेषु प्रावीण्यं समर्जयिष्यन्ति-

- व्याकरणाध्ययनस्य मुख्यानुषङ्गिकप्रयोजनप्रतिपादने,
- अक्षरसमाम्नायस्थवर्णानामुपदेशप्रयोजनप्रतिपादने ।
- व्याकरणदर्शनस्य मूलभूततत्त्वानां शब्दनित्वानित्यत्वशब्दप्रयोगधर्माधर्मशब्दस्वरूपस्फोटध्वन्यादि-परिचयसम्बद्धविषयाणामुपस्थापने ।
- महाभाष्यकारस्य पतञ्जलेर्विषयविवेचनशैल्या वैशिष्ट्यख्यापने ।
- विपक्षमतनिरसनपूर्वकं न्यायसिद्धान्तानुसारेणानुमानोपमानशब्दप्रमाणानां विवेचने ।
- लक्षणपरिष्करणे, तत्राव्याप्त्यतिव्याप्त्यसम्भवदोषाणां निराकरणे च ।

| प्रकरणानि | प्रकरणगतविशेष्टोद्देश्यानि | पाठ्यांशविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| **क** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>व्याकरणाध्ययनस्य | व्याकरणमहाभाष्यस्य पस्पशाह्निकस्था विषयाः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | मुख्यानुषङ्गिकप्रयोजनप्रतिपादने,<br>शब्दस्य नित्यानित्यत्वविवेचने,<br>'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्याने,<br>व्याकरणपदार्थविवेचने,<br>वर्णसमाम्नायस्य प्रयोजनप्रतिपादने,<br>स्फोटध्वन्यादिपरिचयविषये पातञ्जलशैल्याः स्वरूपनिरूपणे च । | | | |
| **ख** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>वर्णसमाम्नायस्थस्याकारस्य विवृतोपदेशस्य प्रयोजनप्रतिपादने,<br>वर्णसमाम्नाये जातिपक्षसिद्धान्तस्योपस्थापने,<br>हकारस्य द्विरुपदेशप्रयोजननिरूपणे,<br>सन्ध्यक्षरेषु अतपरत्वनिर्णये,<br>वर्णानामर्थवत्वाऽनर्थकत्वविवेचने,<br>अणिण्सूत्रयोर्णकारानुबन्धप्रयोजननिरूपणे<br>अक्षरसमाम्नायोपदेशप्रयोजनप्रतिपादने च । | व्याकरणमहाभाष्यस्य प्रत्याहाराह्निकस्था विषयाः | २० | ३२ |
| **ग** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>अनुमितिनिरूपणे,<br>परामर्शस्वरूपरिचायने,<br>परमतनिराकरणपूर्वकमनुमितिपरामर्शयोः कार्यकारणभावस्थापने,<br>पूर्वपक्षव्याप्तेः स्वरूपप्रदर्शने,<br>सिद्धान्तपक्षव्याप्तेः स्वरूपनिरूपणे,<br>सिद्धान्तव्याप्तिलक्षणघटकपदानां प्रयोजनप्रदर्शने च । | न्यायसिद्धान्तमुक्तावल्या अनुमानखण्डस्य आरम्भतः सिद्धान्त-व्याप्तिनिरूपणान्तर्गता विषयाः | २० | ३२ |
| **घ** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>पक्षतायाः स्वरूपनिरूपणे,<br>सभेदं हेत्वाभासस्वरूपविश्लेषणे,<br>हेत्वाभाषभेदप्रतिपादने,<br>उपमानप्रमाणस्य सोदाहरणं विवेचने च । | न्यायसिद्धान्तमुक्तावल्या पक्षता-हेत्वाभासोपमान-निरूपणान्तर्गता विषयाः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| ङ | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>शब्दशक्तिविषयकमतविश्लेषणे,<br>सोदाहरणानां शक्तिग्राहकाणां परिचयोपस्थापने,<br>जातिव्यक्तिवादीनां मतसमीक्षणे,<br>समतभेदं सोदाहरणञ्च लक्षणाभेदनिरूपणे,<br>शाब्दबोधप्रकारविवेचने,<br>शाब्दबोधकाराणानां परिचयप्रदाने च । | न्यायसिद्धान्तमुक्तावल्या शब्दखण्डस्था विषयाः | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

**'क' प्रकरणे-**

पस्पशाह्निके- व्याकरणाध्ययनस्य साक्षात्प्रयोजनप्रतिपादनम्, शब्दस्य द्वैविध्यं प्रतिपाद्य गौरिति विज्ञाने प्रतिभासमानेषु वस्तुप्रक्रियादीन् निरस्य व्याकरणसिद्धान्ते **शब्दः क** इति विश्लेषणम्, ध्वनिस्वरूपम्, व्याकरणाध्ययनस्य रक्षोहागमलघ्वसन्देहाः प्रयोजनमित्यस्य व्याख्यानम्, तस्य आनुसङ्गिकानि प्रयोजनानि तेऽसुरा इत्यादीनि, अपशब्दोपदेश निराकरणेन साधुशब्दोपदेशनिर्धारणम्, शब्दप्रतिपत्तौ उत्सर्गापवादभावे एव लाघवप्रतिपादनम्, शब्दनित्यत्वानित्यत्वविचारः, 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्यानम्, शास्त्रस्य नैरर्थक्यनिराकरणम्, शास्त्राध्ययनेन धर्मोत्पत्तिनिरूपणम्, शब्दार्थज्ञाने धर्मः ? उत प्रयोगे वा ? इति, शब्दस्य महान् प्रयोगविषय इति प्रदर्शनम् । कः व्याकरणपदार्थः ? इति विवेचनम्, वर्णानामुपदेशप्रयोजनम्, वर्णेषु जात्युपदेशनिरूपणञ्च ।

**'ख' प्रकरणे-**

प्रत्याहाराह्निके- अकारस्य विवृतोपदेशनिरूपणम्, वर्णसमाम्नाये जातिपक्षनिरूपणम्, लृकारोपदेशस्य प्रयोजनम्, सन्ध्यक्षरेषु अतपरत्वस्थापनम्, वर्णदेशग्रहणाग्रहणनिर्णयः, हकारस्य द्विरुपदेशप्रयोजनम्, रेफस्योपदेशस्य निर्णयः, अयोगवाहानां स्वरूपं तदुपदेशनिर्धारणञ्च, वर्णानामर्थवत्वानर्थकत्वविवेचनम्, प्रत्याहारेषु अनुबन्धानां ग्रहणाभावविचारः, अणिण्प्रत्याहारेषुणग्रहणस्य प्रमाणप्रदर्शनम्, अक्षरशब्दस्वरूपविवेचनम्, वर्णसमाम्नायोपदेशप्रयोजनम्, माहेश्वरसूत्राणां व्याख्यानञ्च ।

**'ग' प्रकरणे-**

प्रत्यक्षनिरूपणानन्तरमनुमितिनिरूपणे सङ्गतिप्रदर्शनम्, अनुमितिलक्षणविवेचनम्, व्याप्तिपरामर्शानुमितिषु क्रमव्युत्पादनम्, अनुमितिपरामर्शयोः कार्यकारणभावव्यवस्थापनम्, परार्थानुमाने पञ्चावयववाक्यस्य कारणत्वप्रदर्शनम्, अनुमितौ ज्ञायमानलिङ्गस्य करणत्वस्वीकर्तुर्मतखण्डनम्, परामर्शविषये मीमांसकमतमुद्भाव्य तत्खण्डनम्, स्वमतस्थापनम्, पूर्वपक्षव्याप्तिलक्षणनिर्वचनम्, तत्रत्यानां

पदानां प्रयोजननिरूपणम्, तत्र दोषोद्भावनेन सिद्धान्तव्याप्तेरवतरणम्, सिद्धान्तव्याप्तेः स्वरूपेण समन्वयात् घटः सत्तावान् जातेरित्यादौ पूर्वपक्षव्याप्तिलक्षणसङ्गमनदोषनिराकरणम्, चालनीयन्यायेनाऽभावमादाय सद्हेतावव्याप्तिप्रदर्शनम्, तद्वारणायावच्छेदकत्वानुसरणबीजोद्घाटनम्, एवमेव सिद्धान्तव्याप्तिलक्षणपरिष्कारः, सिद्धान्तव्याप्तिलक्षणघटकपदानां प्रयोजनप्रदर्शनञ्च ।

**'घ' प्रकरणे-**

सिद्धान्तव्याप्तेः निरूपणनन्तरं पक्षतानिरूपणे सङ्गतिप्रदर्शनपुरस्सरं पक्षतास्वरूपविवेचनम्, पक्षतालक्षणस्य सपदकृत्यं परिष्कारः, पक्षताया अनन्तरं हेत्वाभासस्य निरूपणे सङ्गतिं प्रदर्श्य हेत्वाभासशब्दव्युत्पत्तिविचारः, सभेदं तस्य वर्णनम्, हेत्वाभासलक्षणघटकान्यपदप्रयोजनप्रदर्शनम्, तल्लक्षणघटकपदानामर्थनिरूपणम्, सोदाहरणं पञ्चविधानां हेत्वाभासानां स्वरूपविवेचनम्, हेत्वाभासविशेषेषु हेत्वाभासलक्षणसमन्वयप्रकारः, साधारणाऽसाधारणानुपसंहारिभेदेन सव्यभिचारस्य भेदत्रयनिरूपणम् । विरुद्धाश्रयसिद्धिस्वरूपसिद्धिव्याप्यत्वासिद्धिसत्प्रतिपक्षबाधादिहेत्वाभासानां कारिकानुसारेण लक्षणोदाहरणप्रदर्शनञ्च ।

अनुमाननिरूपणोत्तरम्- उपमाननिरूपणे सङ्गतिप्रदर्शनम्, उपमानस्यातिरिक्तप्रमाणत्वव्यवस्थापनम्, उपमितेः स्वरूपनिर्वचनेन द्वैविध्यत्वप्रतिपादनम्, तस्य सोदाहरणं विवेचनञ्च ।

**'ङ' प्रकरणे-**

उपमानान्तरं शब्दनिरूपणे सङ्गतिनिरूपणेन सह शाब्दबोधस्य करणव्यापारादीनां प्रतिपादनम्, शक्तेः स्वरूपविचारः, शक्तिग्रहोपायवर्णनम्, वैयाकरणादीनां मतेन शक्त्याश्रयत्वं प्रतिपाद्य नैयायिकमतेन प्रत्याख्यानम्, जातिशक्तिवादिमतनिरसनपूर्वकं व्यक्तिशक्तिवादिमतविवेचनम्, सिद्धान्तमतनिरूपणम्, पदस्य लक्षणम्, तस्य प्रकाराश्च, लक्षणाया भेदाः, तदुदाहरणञ्च, वाक्यलक्षणाखण्डनम्, आसत्ति-योग्यता-आकाङ्क्षा-तात्पर्यज्ञानानां शाब्दबोधे कारणत्वनिरूपणम्, तात्पर्यज्ञानार्थमीश्वरसिद्धिविचाराश्च ।

**५. शिक्षणविधिक्रियाकलापश्च**

अस्य पाठ्यांशस्य शिक्षणे संस्कृते बहुप्रचलिता निगमागमव्याख्यानप्रवचनप्रश्नोत्तरात्मकाः विधय एव आवश्यकतानुसारेण यथायथं प्रयोक्तव्याः । कक्षायां शिक्षकेण सह छात्रानपि सक्रियान् विधाय विषयवस्तुबोधाय विषयविश्लेषणाय च छात्राः समुत्प्रेरणीयाः । यथायथं शिक्षणोपकरणानां प्रयोगं विधाय शिक्षणप्रक्रियायां सारल्यमानेतव्यम् । आवश्यकतामाकलय्य यथासमयं विश्वविद्यालयो दूरशिक्षणपद्धतेः प्रयोगाय योजनामग्रेसारयितुं शक्नोति । तस्य कृते वैद्युतोपकरणानां प्रयोगोऽपि समपेक्ष्यते ।

**६. मूल्याङ्कनम्-**

पाठ्यक्रमममुमधीयानानां छात्राणां मूल्याङ्कनं द्विविधया पद्धत्या विधीयते । विंशत्यङ्कानां मूल्याङ्कनमान्तरं निर्माणात्मकं वा भविष्यति चेत्तर्हि असीत्यङ्कानां मूल्याङ्कनं वार्षिकलेखपरीक्षामाध्यमेन विधास्यते । निर्माणात्मकमूल्याङ्कनस्य वार्षिकमूल्याङ्कनस्य च निर्देशिका परीक्षानियन्त्रणकार्यालयस्य समन्वयेन यथासमयं प्रकाशयिष्यते ।

(क) आन्तरिकमूल्याङ्कयोजना-

| शीर्षकम् | अङ्काः |
|---|---|
| उपस्थितिः | ३ |
| कक्षाकार्यकलापः | ३ |
| प्रतिवेदनलेखनम्, परियोजनाकार्यञ्च | ६ |
| आन्तरिकी परीक्षा | ८ |
| योगः | २० |

(ख) बाह्यमूल्याङ्कनयोजना-

| क्र.सं. | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | अङ्कभारः | अङ्काः |
|---|---|---|---|---|---|
| १. | विवेचनात्मकाः | ३ | २ | १२ × २ | २४ |
| २. | व्याख्यानात्मकाः | ५ | ३ | ८ × ३ | २४ |
| ३. | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ × ६ | ४२ |
| ४. | वस्तुगताः | १० | १० | १ × १० | १० |
| | **योगः** | **२७** | **२१** | | **१००** |

## पाठ्यग्रन्थसूची

**(क) पाठ्यग्रन्थौ**

१. पतञ्जलिः, **व्याकरणमहाभाष्यम्** (पस्पशाह्निकप्रत्याहाराह्निके) दिल्ली : मोतीलाल वनारसीदासः, ई. १९६७ ।

२. विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली,** (अनुमानखण्डतः शब्दखण्डपर्यन्तम्) पञ्चमं संस्करणम्, वाराणसी : चौखम्भा संस्कृत संस्थानम्, संवत् २०४५ ।

**(ख) सन्दर्भग्रन्थाः**

१. विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली**, अनुमानखण्डतः शब्दखण्डपर्यन्तम्, पञ्चमं संस्करणम्, वाराणसी : चौखम्भा संस्कृतसंस्थानम्, संवत् २०५२ ।

२. अन्नम्भट्टः, **तर्कसङ्ग्रहः** दीपिकाकिरणावलीन्यायबोधिनीपदकृत्यटिप्पण्यादिसहितः, वाराणसी : व्यासप्रकाशनम् ।

३. भट्टोजिदीक्षितः, **वैयाकरणसिद्धान्तकौमुदी,** बालमनोरमातत्त्वबोधिनीसहिता, वाराणसी : मोतीलाल, वनारसीदासः, ई १९६५ ।

+++